M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 922

Title: Sarvatobhadramandala

922

Z

		Sarvatōbhadramandile	Title.
			Author.
			Editor.
		Samvat 1850	Year, Vols.
8K			Publisher.
Karmakanda.			Remark.

922

मं॰देवता: १ श्रीगणेशायनमः ॥ ॥ ॐम् ॥ वक्ष्यामिसर्वतोभद्रंमंडलाराधनंशुभं । उद्यापनादिषुतत्कार्यंक
र्तव्यंसकलेषुयत् ॥ प्राग्आयताउदक्संस्था: प्राक्संस्थाउदगायता ॥ एकोनविंशति: कार्यारेखापि
ष्टेनधीमता ॥ खंडेंदुस्त्रिपदाकोणेपंचपादाश्वशृंखला ॥ एकादशपदावल्लीभद्रंतुनवभि: पदै:
॥ चतुर्विंशतिभिर्वापिविंशति: परिधि: कृतं ॥ मध्येषोडशभि: कोष्ठै: पद्ममष्टदलंस्मृतं ॥ को
णेषुत्रिपदाशृंखलाह्यापंचपदै: स्मृता ॥ नीलेनपूर्यतेवल्लीभद्रारुणप्रपूरिता ॥ सीतेनपूर्य
तेवापीपरिधि । पीतवर्णिका ॥ ब्रह्मांतरदलंश्वेतंकर्णिकापीतवर्णिका ॥ ६ ॥ सत्वंरजस्तमोप
लक्षबाह्य: परिधयस्त्रता: ॥ इत्येतन्मंडलंलेख्यंमध्याराधनमुच्यते ॥ ब्रह्मस्थानंस्मृतंमध्येसो
ममुत्तरतोन्यसेत् ॥ ईशान्यामीश्वरंप्रोक्तंप्राच्यामिंद्रंप्रकल्पयेत् ॥ आग्नेय्यामग्निमावाह्यद
क्षिणेतुयमंन्यसेत् ॥ नैर्ऋत्यांनिर्ऋतिंपूज्यप्रतीच्यांवरुणंन्यसेत् ॥ वायव्यामनिलंपूज्यसो एम॰ १
मवायोर्वसूस्तथा ॥ सोमेशमध्यभागस्थारुद्राएकादशास्मृता: ॥ ईशानइंद्रयोर्मध्येह्यादि

त्याद्वादशंकुर्याइंद्राग्निमध्यभागंचअश्विनौतत्रकारयेत् । अग्निंचयमध्येतुविश्वेदेवा: प्रक
ल्पयेत् ॥ याम्यनिर्ऋतिमध्येतुसप्तयक्षा: प्रकीर्तिता: १२ नैर्ऋत्यांवरुणंमध्येनागंतत्रप्रपूज
येत् ॥ वायुवरुणयोर्मध्येगंधर्वाप्सरसस्तथा ॥ ब्रह्मसोमांतरेरुद्रंब्रह्मेशानंतरेतथा ॥ स्कंदंनंदी
श्वरंशूलंमहाकालींप्रकल्पयेत् ॥ ब्रह्मइंद्रद्वयोर्मध्येब्रह्मविस्नुंप्रकल्पयेत् ॥ ब्रह्माग्निरंतराले
चस्वधातत्रैवकारयेत् ॥ ब्रह्मायमस्यमध्येतुमृत्युरोगौप्रकल्पयेत् ॥ ब्रह्मानिर्ऋतिमध्येतुगणे
शंतुप्रपूजयेत् ॥ ब्रह्मावरुणयोर्मध्येअपस्तत्रचविन्यसेत् ॥ ब्रह्मावायुश्चमध्येतुमरुतोशे
प्रकीर्तिता: ॥ ब्रह्मण: पादमूलेतुमेदिनींतत्रविन्यसेत् ॥ सरित: सागरा: सर्वेपूजिताब्रह्मपार्श्व
यो: १८ गंगाचयमुनागोदानर्मदाचसरस्वती ॥ क्षारक्षीरदधिमधुघृतेक्षुचसुरातथा ॥ प्रो
वाचेदंवसिष्ठस्तुमंडलाराधनंक्रमात् ॥ उद्यापनविधौनृणांसुखाराधनसिद्धये २०
अथमंत्रा: ॥ ॥ ब्रह्मजज्ञानंगोतमोवामदेवोब्रह्मात्रिष्टुप् ॥ ब्रह्मावाहनेविनियोग: ॐ

२ म्ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विशीमतः सुरुचोवेन आवः॥ सबुध्न्याउपमा अस्यविष्ठाः सतश्चयो
निमसतश्चविवः॥ मंडलमध्येब्रह्मणेनमः॥ ब्रह्माणंआवाहयामिस्थापयामिपूजयामि॥ आप्या
यस्वएहूगणोगौतमः सोमोगायत्री॥ सोमावा॰ ओं॥ आप्यायस्वसमेतुतेविश्वतः सोमवृष्ण्यं॥
भवावाजस्यसंगथे॥ उत्तरस्यांदिशिसोमायन॰ सोमंआ॰ २ अभित्वादेवाजीगर्तःशुनः
शेपईशानोगायत्री॥ ईशानावाहनेवि॰ ॐ अभित्वादेवसवितरीशानंवार्याणां॥ सदाव
न्भागमीमहे॥ ईशान्यांईशानाय॰ ईशानंआवा॰॥ ३॥ इंद्रंवोवेश्वामित्रोमधुछंदा इंद्रो
गायत्री॥ इंद्रावाहनेवि॰ ॐ इंद्रंवोविश्वतस्परिहवामहेजनेभ्यः॥ अ[redacted]
स्माकमस्तुकेवलः॥ प्राच्यामिंद्रायन॰ इंद्रंवाआ॰॥४॥ अग्निंहूतंकाण्वोमेधातिथिरग्नि
र्गायत्री॥ अग्न्यावा॰ ॐ अग्निंहूतंहूणीमहेहोतारंविश्ववेदसं॥ अस्ययज्ञस्यसुक्रतुं॥ राम.
आग्नेय्यामग्नयेन॰ अग्निंआवाह॰५॥ यमायसोमंवैवस्वतोयमोनुष्टुप्॥ यमावाह॰ ॐ २

यमायसोमंसुनुतयमायजुहुताहविः॥ यमंहयज्ञोगछत्यग्निदूतोअरंकृतः॥ दक्षिणस्यांय
मायन॰ यमंआ॰ ६ मोषुणोघोरकण्वोनिर्ऋतिर्गायत्री॥ निर्ऋत्यावा॰ ॐ मोषुणः परापर
रानिर्ऋतिर्दुर्हणावधीत्॥ पदीष्टतृष्णयासह॥ नैर्ऋत्यांनिर्ऋतयेन॰ निर्ऋतिंआवाह॰॥७॥
त्वंनोअग्नेगौतमोवामदेवोवरुणस्त्रिष्टुप्॥ वरुणावाहने॰ ॐ त्वंनोअग्नेवरुणस्यविद्वान्दे
वस्यहेळोवयासिसीष्ठाः॥ यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्॥ प्रती
च्यांवरुणा॰ वरुणंआ॰॥८॥ वायोशतंगौतमोवामदेवोवायुरनुष्टुप्॥ वाय्वावाह॰ ॐ वा
योशतंहरीणांयुवस्वपोष्याणां॥ उतवातेसहस्त्रिणोरथआयातुपाजसा॥ वायव्यांवायवे॰
वायुंआ॰ ९ ज्मयाअत्र मैत्रावरुणोवसिष्ठोवसवस्त्रिष्टुप्॥ वस्वावाहने॰ ॐ ज्मयाअत्र
वसवोरंतदेवाउरावंतरिक्षेमर्जयंतशुभ्राः॥ अर्वाकपथउरुज्रयः कृणुध्वंश्रोतादूतस्य

मं॰ल॰दे॰ जगमुखोनो अस्य॥ वायव्योत्तरयोर्मध्ये नवपदाभद्रोपरि अष्टवसुभ्यो न॰ वसूनावा॰ १०
३ आ रुद्रास आत्रेयार्चनः श्यावाश्व एकादश रुद्रो जगती॥ रुद्रावा॰॥ आ रुद्रास इंद्रवंतः स
जोषसो हिरण्यरथाः सुविताय गंतन॥ इयं वो अस्मत्प्रति हर्यते मतिस्तृष्णजे न दिव उत्सा उ
दन्यवे॥ सोमेशानमध्ये नवपदाभद्रोपरि एकादशरुद्रेभ्यो नम॰॥ एकादशरुद्रानावाह॰॥
११ त्यान्नुक्षत्रियानिति वामदेव आदित्यो गायत्री॥ आदित्यावा॰॥ त्यान्नु क्षत्रियाँ अव
आदित्यान्याचिषामहे॥ सुमृळीकाँ अभिष्टये॥ ईशानेंद्रयोर्मध्ये नवपदाभद्रोपरि द्वा
दशादित्येभ्यो॰ द्वादशादित्यानावा॰ १२ अश्विनावर्तिरहुगणो गोतमो श्विनावुष्णिक्॥
अश्विना॰ अश्विनावर्तिरस्मदा गोमद्दस्रा हिरण्यवत्॥ अर्वाग्रथं समनसा नियच्छतं॥ एम॰
इंद्राग्नियोर्मध्ये नवपदाभद्रोपरि अश्विभ्यां॰ अश्विनौ आवा॰॥१३॥ ओमासो वैश्वामि ३

त्रो मधुच्छंदा विश्वेदेवा गायत्री॥ विश्वेदेवावा॰ ॐ ओमासश्चर्षणीधृतो विश्वे देवास आगत॥
दाश्वांसो दाशुषः सुतं॥ अग्निदक्षिणयोर्मध्ये नवपदाभद्रोपरि विश्वेभ्यो देवेभ्यो न॰ विश्वा
न्देवानावाहया॰ १४ अभित्यं देवं गोतमो वामदेवो सप्तयक्षा अष्टी॥ सप्तयक्षावा॰ ॐ अ
भि त्यं देवं सवितारमोण्योः कविक्रतुमर्चामि सत्यसवं रत्नधामभि प्रियं मतिं मूर्ध्वा यस्या
मतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः॥ यमनिर्ऋत्यो
र्मध्ये नवपदाभद्रोपरि सप्तयक्षेभ्यो न॰ सप्तयक्षानावाह॰ १५ आयं गौः सार्पराज्ञः स
र्पा गायत्री॥ सर्पावा॰ ॐ॰ आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः॥ पितरं च प्रयन्त्स्वः॥
निर्ऋतिवरुणयोर्मध्ये नवपदाभद्रोपरि सर्पेभ्यो नमः॥ सर्पानावा॰॥ १६॥ अप्सरसामात्रेयो गं
धर्वाप्सरसो नुष्टुप्॥ गंधर्वाप्सरसावाहने॰ ॐम्॰ अप्सरसां गंधर्वाणां मृगाणां चरणे चरन्॥
केशी केतस्य विद्वान्सखा स्वादुर्मदिंतमः॥ वरुणवायुमध्ये नवपदाभद्रोपरि गंधर्वाप्सरसेभ्यो

मं॰ड॰ म॰ड॰
४

नमः॥ गंधर्वाप्सरसामावा०॥ १७॥ कद्रुद्रायघोरःकण्वोरुद्रोगायत्री॥ रुद्रावाह० ॐ कद्रुद्रायप्रचेत
सेमीढुष्टमायतव्यसे॥ वोचेमशंतमंहृदे॥ ब्रह्मसोमयोर्मध्येचतुर्विंशतिपदावाप्योपरिरुद्राय०॥
रुद्रंआ० १८ यदक्रंदःप्रथमोदीर्घतमास्कंदस्त्रिष्टुप्॥ स्कंदावाह ॐ यदक्रंदःप्रथमंजाय
मानउद्यन्त्समुद्रादुतवापुरीषात्॥ श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यंमहिजातंतेअर्वं
न्॥ ब्रह्मेशानयोर्मध्येपंचपदाश्मंखलोपरिस्कंदाय० स्कंदंआ०॥ १९॥ ऋषभंमावैराजोनंदीश्व
रोनुष्टुप्॥ नंदीश्वरावा० ॐ ऋषभंमासमानानांसपत्नानांविषासहिं॥ हंतारंशत्रूणांकृधि
विराजंगोपतिंगवां॥ तत्रैवाश्मंखलोपरिनंदीश्वराय० नंदीश्वरंआ०॥ २०॥ कुमारंमातत्रेयःकु
मारःशूलस्त्रिष्टुप्॥ शूलावा० ॐ कुमारंमातायुवतिःसमुब्धंगुहाबिभर्तिनददातिपित्रे॥ अ
नीकमस्यनमिनज्जनासःपुरःपश्यंतिनिहितमरतौ॥ तत्रैवाश्मंखलोपरिशूलाय० शूलंआ एम॰
वा०॥ २१॥ अदितिर्लौक्योमहाकाल्यनुष्टुप्॥ महाकाल्यावाह०॥ ॐ अदितिर्ह्यजनिष्टदक्ष ४

यादुहितातव॥ तांदेवाअन्वजायंतभद्राअमृतबंधवः॥ तत्रैवमहाकाल्यैन० महाकालीआवा
०॥ २२॥ तामग्निवर्णांकौशिकोदुर्गात्रिष्टुप्॥ दुर्गावा० ॐ तामग्निवर्णांतपसाज्वलंतींवैरोच
नींकर्मफलेषुजुष्टां॥ दुर्गांदेवींशरणमहंप्रपद्येसुतरसितरसेनमः॥ ब्रह्मेंद्रयोर्मध्येवाप्यो
परिदुर्गायैनमः॥ दुर्गांआवा० २३॥ इदंविष्णुःकाण्वोमेधातिथिर्विष्णुर्गायत्री॥ विष्णुवावा०
ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥ समूल्हमस्यपांसुरे॥ तत्रैवाप्योपरिविष्णवे० विष्णुं
आवा०॥ २४॥ उदीरतांयामायनःशंखःस्वधात्रिष्टुप्॥ स्वधावा० ॐ उदीरतामवरउत्परास
उन्मध्यमाःपितरःसोम्यासः॥ असुंयईयुरवृकाऋतज्ञास्तेनोहवंतुपितरोहवेषु॥ ब्रह्मा
ग्नियोर्मध्येपंचपदाश्मंखलोपरिस्वधायैन० स्वधांआवा०॥ २५॥ परंमृत्योयामानःसंकुशि
कोमृत्युरोगौत्रिष्टुप्॥ मृत्युरोगावाहनेवि० ॐ परंमृत्योअनुपरेहिपंथांयस्तेस्वइतरोदेव
यानात्॥ चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजांरीरिषोमोतवीरान्॥ यमब्रह्मांतरयोर्मध्ये

मं॰ड॰ म॰उ॰ ५ वाप्योपरिमृत्युरोगाभ्यां न॰ मृत्युरोगौ आवाह॰॥२६॥गणानांत्वा शौनकोगृत्समदो गणपति
र्जगती॥गणपत्या॰ ॐ गणानांत्वागणपतिंहवामहे कविंकवीनामुपमश्रवस्तमं॥ ज्येष्ठराजं
ब्रह्मणांब्रह्मणस्पतआनः शृण्वंनूतिभिः सीदसादनं॥ ब्रह्मनिर्ऋत्योर्मध्ये पंचपदाग्रं खलो
परिगणपतये न॰ गणपतिं आ॰॥२७॥शंनोदेवीरंबरीषः सिंधुद्वीप आपो गायत्री॥ अपा
वाह॰ ॐ शंनोदेवीरभिष्टय आपोभवंतुपीतये॥शंयोरभिस्रवंतुनः॥ब्रह्मवरुणयोर्मध्ये
चतुर्विंशतिपदावाप्योपरि अद्भ्योनमः॥ अप आ॰॥२८॥महतोयस्यराहूगणोगोतमोम
रुतोनुष्टु॥मरुद्दावा॰ ॐ महतोयस्यहिक्षयेपाथादिवोविमहसः॥सकृगोपातमोजनः॥
ब्रह्मानिलयोर्मध्येपंचपदाग्रं खलोपरि अष्टमरुद्भ्यो न॰ अष्टमरुतानावा॰॥२९॥स्यो
नापृथिवीकाण्वोमेधातिथिर्भूमिर्गायत्री॥भूम्यावा॰ ॐ स्योनापृथिविभवानृक्षरानिवेश राम॰
नी॥छानःशर्मसप्रथः॥ब्रह्मवरुणयोर्मध्येवाप्योपरिभूम्यै न॰ भूमिं आवा॰॥३०॥इमं ५

मंगंगेसिंधुद्वीपः पंचनद्यो जगती॥नद्यावाह॰ ॐ इमंमेगंगेयमुने सरस्वतिशुतुद्रिः स्तोमंसचतापरु
ष्ण्या॥ असिक्न्यामरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया॥ब्रह्मपार्श्वयोः पंचनदीभ्यो॰ गंगा
यै न॰ गंगां आ॰ यमुनायै॰ यमुनां आवा॰ गोदावर्यै न॰ गोदावरीं आ॰ नर्मदायै॰ नर्मदां आ॰ स
रस्वत्यै न॰ सरस्वतीं आ॰ पंचनदी आवाह॰॥ ॐ॥ धाम्नोधाम्नोगौतमोवामदेवः सप्तसिंधवो बृ
हती॥सिंध्वावा॰ ॐ धाम्नोधाम्नोराजन्नितोवरुणनोमुंचयदापो अघ्न्या वरुणेतिशपामहे
ततोवरुणनोमुंच॥ब्रह्मपार्श्वयोः क्षारसागरा॰ क्षारसागरं आ॰ क्षीरसागराय॰ क्षीरसाग
रं आ॰ दधिसागराय॰ दधिसागरं आवा॰ मधुसागराय॰ मधुसागरं॰ घृतसागरा॰ घृतसा
गरं॰ ईक्षुसाग॰ ईक्षुसागरं आ॰ स्वरसागरा॰ स्वरसागरं आ॰ सप्तसिंधून् आवाह॰॥ ॥
इतिसर्वतोभद्रदेवताक्रमः॥ पूर्वादिदिक्षु॥ इंद्राण्यै नमः॥स्वाहायैः प्रथमायै॰ निर्ऋत्यै॰
वारुण्यै न॰ वायव्यै॰ कुबेरप्रियायै॰ रुद्राण्यै न॰ वायव्यै॰ कुबेरप्रियायै॰ रुद्राण्यै न॰॥८॥

मं॰ड॰ मं॰ड॰ ६ पुनः पूर्वादि॥ वज्रं॰ शक्तिं॰ दंडं॰ खड्गं॰ पाशं॰ ध्वजं॰ अक्कं॰ त्रिशूलं॰॥ ८॥ पुनः पूर्वादि॥
गजं॰ मेषं॰ महिषं॰ शावं॰ मकरं॰ मृगं॰ नरं॰ वृषभं॰॥ ८॥ पुनः पूर्वादि॥ ऐरावतं॰ पुंडरी
कं॰ वामनं॰ कुमुदं॰ अंजनं॰ पुष्पदंतं॰ सर्वभौमं॰ सुप्रतीकं॰॥ ८॥ पुनः पूर्वादिचतु
र्दिक्षु॥ गणपतिं॰ सप्तमातृः॥ दुर्गां॰ क्षेत्राधिपतिं॰॥ ४॥ बाह्ये। कश्यपं॰ अत्रिं॰ भा
रद्वाजं॰ विश्वामित्रं॰ गौतमं॰ जमदग्निं॰ वसिष्ठं॰ अरुंधं॰॥ ८॥ तद्बाह्ये॰ महावैम
तिष्ठा॰ प्रतिष्ठाप्यतत्तन्मंत्रैः॥ ॥इतिमंडलदेवताः॥ ॥अथलिंगतोभद्रविशेषः॥
॥अत्रापिप्रागुक्तब्रह्माद्यामंडलदेवतास्थापयेत्॥ पूर्वादि॥ असितांगभैरवायनमः॥
ॐ चंडभैरवं॰ ॐ रुरुभैरवं॰ क्रोधभैरवं॰ उन्मत्तभैरवं॰ कपालभैरवं॰। भीषणभैरवं॰ महाभै
रवं॰॥ पुनः॥ भवं॰ शर्वं॰ ईशानं॰ पशुपतिः रुद्रं॰ उग्रं॰ भीमं॰ महांतं॰॥ ८॥ पुनः अनंतं॰ राम॰
वासुकिं॰ तक्षकं॰ कुलिशं॰ कर्कोटकं॰ शंखपालं॰ कंबलं॰ अश्वतरं॰॥ ८॥ ईशानेंद्रयोर्मध्ये। ६

शूलिनं॰ इंद्राग्निमध्ये। चंद्रमौलिं॰ अग्नियममध्ये॥ चंद्रमसं॰ यमनिर्ऋतिमध्ये॥ वृषभध्वजं॰
निर्ऋतिवरुणमध्येत्रिलोचनं॰। वरुणवायुमध्येशक्तिधरं॰। वायुसोममध्ये। महेश्वरं॰ सोमेशा
नमध्येशूलधारिणं॥ मध्येकलशोपरि ॐ नमोभगवतेरुद्रायेतिरुद्रं आवाहयामि॥ ॥इति
लिंगतोभद्रविशेषः॥ ॥अथहोमः॥ ॥ब्रह्मणेस्वाहा॥ सोमायस्वा॰ ईशानाय॰ इंद्राय॰ अग्न
ये॰ यमायनिर्ऋतये॰ वरुणाय॰ वायवे॰ वसुभ्य॰ रुद्रेभ्यः॰ आदित्येभ्यः॰ अश्विभ्यां॰ विश्वे
भ्योदेवेभ्यः॰ सप्तयक्षेभ्यः॰ सर्पेभ्यः॰ गंधर्वाप्सरोभ्यः॰ रुद्राय॰ स्कंदाय॰ नंदीश्वराय॰ शूला
य॰ महाकाल्यै॥ दुर्गायै॰ विष्णवे॥ स्वधायै॰ मृत्युरोगेभ्यां॰ गणपतये॰ अद्भ्यः॰ मरुद्भ्यः॰ भू
म्यै॰ ३॰ गंगायै॰ यमुनायै॰ गोदावर्यै॰ नर्मदायै॰ सरस्वत्यै॰ ५ क्षारसागरायन॰ क्षीरसाग
राय॰ दधिसागराय॰ मधुसागराय॰ घृतसागराय॰ ईक्षुरससागराय॰ सुरासागरायस्वा
हा॥ ७॥ ४२ इंद्राण्यै॰ स्वाहायै॰ प्रथमायै॰ निर्ऋतये॰ वारुण्यै॰ वायव्यै॰ कुबेरप्रियायै॰

ग्र॰ मंडल॰ ७ रुद्राण्यै॰ ८ वज्राय॰ शक्त्यै॰ दंडाय॰ खड्गाय॰ पाशाय॰ ध्वजाय॰ अंकुशाय त्रिशूलाय॰ ८
गजाय मेषाय॰ महिषाय॰ शरभाय॰ मकराय॰ मृगाय॰ नराय॰ वृषभाय॰ ८ ऐरावताय॰ पुंड
रीकाय॰ वामनाय॰ कुमुदाय॰ अंजनाय॰ पुष्पदंताय॰ सार्वभौमाय॰ सुप्रतीकाय॰ ८ गण
पतये॰ सप्तमातृभ्यः॰ दुर्गायै॰ क्षेत्राधिपतये॰ ४ कश्यपाय॰ अत्रये॰ भरद्वाजाय॰ विश्वा
मित्राय॰ गौतमाय॰ जमदग्नये॰ वसिष्ठाय॰ अरुंधत्यै॰ ८॥ ॥इति सर्वतोभद्रदेवताहोमः॥
॥अथ लिंगतोभद्रविशेषः॥ ॥असितांगभैरवाय॰ रुरुभैरवाय॰ चंडभैरवाय॰ क्रोधभै
रवाय॰ उन्मत्तभैरवाय॰ कपालभैरवाय॰ भीषणभैरवाय॰ महाभैरवाय॰ भवाय॰ शर्वाय॰
पशुपतये॰ ईशानाय॰ रुद्राय॰ उग्राय॰ भीमाय॰ महते॰ १६॥ अनंताय॰ वासुकाय॰
तक्षकाय॰ कुलिशायुधाय॰ कर्कोटकाय॰ शंखपालाय॰ कंबलाय॰ अश्वतराय॰ ८ राम॰
शूलाय॰ चंद्रमौलिने॰ चंद्रमसे॰ वृषभध्वजाय॰ त्रिलोचनाय॰ शक्तिधराय॰ महेश्वराय॰ ७

शूलपाणये॰ ८ ॐ नमो भगवते रुद्राय स्वाहा॥ ॥इति लिंगतोभद्रहोमदेवताः॥ ॥३३
एताः॥ ॥अथ लिंगतोभद्रकारिका लिख्यते॥ ॥चतुर्विंशतिरालेख्या रेखाः प्राग्दक्षिणाय
ताः॥ कोणेषु शृंखलाः पंच पदा वल्ल्यास्तु पार्श्वतः॥ पादैर्नवभिरालेख्याश्चतुर्भिर्लघुशृंखलाः
॥ ततो विधिद्वयेनैव पीठं कुर्याद्विचक्षणः॥ तस्य पदाः पंच पदा द्वाराण्यपि तथैव च एका
[illegible]ति पदं मध्ये पश्च लिंगमिष्यते॥ कोणेषु शृंखलाः कार्याः पदैस्त्रिभिरतः परं॥ पदैश्चतुर्भि
[illegible] भद्राण्यथो समंततः॥ एकादशपदा वल्ल्यो मध्ये षट्कमालिखेत्॥ पद्मं नवपदं त्वे
वं लिंगतोभद्रमुच्यते शृंखलाः कृष्णवर्णेन वल्लीं नीलेन पूजयेत्॥ एकेन शृंखला लघ्वी
वल्लीं नीलेन पूरयेत्॥ लिंगानि कृष्णवर्णानि वाप्याश्चेता लघ्व्यस्तथा॥ पद्धिं सपादं श्वेतेन पीतेन
द्वारपूरणं॥ मध्यस्थं रंदं वल्लीं नीलेन पूरयेत्॥ भद्राणि पीतवर्णानि पीतपंकजकर्णिका॥ दला
नि + लारक्तौ + श्वेतवर्णानि यद्वा चित्राणि कल्पयेत्॥ तिस्रो रेखा बहिः कार्याः सितरक्तासितः क्र

ब्र॰मं॰दे॰ मात्॥ ॥इतिलिंगतोभद्रं॥ ॥अथद्वादशलिंगोद्भवं॥ ॥रुद्रयामले॥ प्रागुदगायतारेखाः ष
८ त्रिंशद्विप्रकल्पयेत्॥ पदानि द्वादशशतं पंचविंशतिरेवच॥ त्र्ययोदशपदावापिलिंगमष्टाद
शस्मृतं॥ लिंगानियाम्यपंक्तौतु शोभाकोष्ठाश्चतुर्दश॥ तेषामुपरिपं — — — — — — — —
— — — — पूज्ञापंक्तिस्तु विज्ञेयापरितः परिकल्पिता॥४॥ पूज्ञापत्संतराः पंक्तौकोष्ठेषुव्द्या
शीतिसंख्यया॥ परिधिः सचविज्ञेयोमंडलांतरयोर्द्वयोः॥ परिध्यंतरकोष्ठेषु सर्वतोभद्रमा
लिखेत्॥ विशेषश्चात्रविज्ञेयः शृंखलाषट्पदाभवेत्॥ त्रयोदशपदावल्लीभद्रंतुनवभिःप
दैः पंचविंशत्पदावापीपरिधिः षोडशात्मकः॥७॥ मध्येनवपदैः पत्रंकर्णिकाकेसरान्वितं॥
सत्वंरजस्तमोवर्णाः परितोमंडलस्यच॥ त्रयपरिधयः कार्यास्तत्र द्वाराणिकारयेत्॥ सितंतु
शृंखलाकृष्णावल्लीनीलाप्रकीर्तिताः॥ भद्रंवैवारुणंज्ञेयंवापीस्याच्छुक्लवर्णिका॥ लिंगानिकृ राम॰
— वर्णानिपार्श्वेतोद्वादशैवतु॥ परिधिः पीतवर्णस्यकमलंपंचवर्णकं॥ इदंपूर्वंचशिवराज्ञ्युद्या ८

पतेप्रोक्तं॥ ॥अथचतुर्लिंगोद्भवं॥ लैंगे॥ रेखात्वष्टादशप्रोक्ताश्चतुर्लिंगसमुद्भवे॥ कोणेतु
त्रिपदः श्वेतः त्रिपदैः कृष्णशृंखलाः॥१॥ वल्लीसप्तपदीनांचभद्रंरक्तंचतुष्पदं॥ भद्रपा
र्श्वेमहारुद्रंकृष्णमष्टादशैःपदैः॥२॥ शिवपार्श्वेणवापिंडंकुर्यात्स्यंचपदासितं॥ पद्ममेकंत
थापीतंभद्रवाप्योस्तुमध्यतः॥ शिरसिशृंखलायाश्चकुर्यात्पीतंपदत्रयं॥ लिंगानांस्कंधतःको
ष्ठाविंशतीरक्तवर्णकः॥४॥ परिःधिः पीतवर्णस्तुपदैः षोडशभिस्मृतः॥ परैस्तुनवभिः पश्चा
त्पअंरक्तंसवर्णिकं॥५॥ अथैकलिंगंगौरीतिलकं तिर्यगूर्ध्वगतारेखाकार्यास्त्रिध्वात्रयो
दश॥ कोणेतुत्रिपदः कार्याशृंखलात्रिपदासिता॥ वल्लीचषट्पदानीलाभद्रंरक्तंप्रकल्पयेत्॥
परैर्द्वादशभिस्सष्टंउत्तरेपूर्वदक्षिणे॥२॥ पश्चिमायांमहारुद्रमष्टाविंशतिकोष्ठकैः॥ लिंगपा
र्श्वेतयाम्पूर्धि रखोकोष्ठस्तुपीतकाः॥३॥ लिंगमेकंतथागौर्यास्तिस्त्ररत्रतुमंडले॥ पूजयेन्मंड
लंचेवतस्यगौरीप्रसीदति॥४॥ ॥इत्येकलिंगोद्भवं॥ ॥इतिगागाभट्टकृतेत्रतार्किकरणे छो

ग्र॰ म॰ को॰ तेसर्वतोभद्रलिंगतोभद्रादिमंडलरचनानिर्णयः॥ ॥श्रीलक्ष्मीनारायणार्पणमस्तु॥ ॥अथ
९ लिंगतोभद्रकारिका॥ रेखाः कृत्वा चतुर्विंशतिरुभयतश्चादौ चतुःकोणतोंऽतः कृष्णास्तुः शृंख
लाख्याद्बुपदविततानीलवल्ल्यैकांककोष्ठाः॥ तास्तिर्यग्बावेदक्रमयत उभयतो लोहितावेर
कोष्ठालद्वान्याः शृंखलास्त्रित्रितयमितपदापीतवर्णोपवल्ल्यः॥ पंचत्र्येकत्रिपंचैकमितप
दतमोभानिर्लिंगानि चाष्टौ तन्मध्ये कुत्रिपंचत्रिकुमितसितकोष्ठाश्च तस्त्रश्च वाप्यः॥ लिंगा
ग्रांतस्तु पीतान्यनुदिशमिषुभागानि चत्वारि हित्वा द्वाराणीशादिकोणेषु शरपदसितापी
ठपादा विधेयः॥ चत्वारिंशत्सहंस्यादिदमपि धवलं पीठमंतर्द्वितीयं भद्रं कोणांततोंऽतस्त्रिप
दमरुणं भं शृंखलानां चतुष्कं॥ वल्ल्यो नीलास्त्रिसार्धद्वयत उभयतस्त्वेककोष्ठं चतुष्कं लिं
गानां रक्तमंतं नवपदकमलं लिंगतोभद्रमेतत्॥ ३॥ अन्येतरक्तमोभिस्याद्दादृतं बाह्य राम॰
तोऽसितः॥ अत्र पंक्तिक्रमो ज्ञेयो नांकानां वामतो गतिः॥ ४॥ ॥इति लिंगतोभद्रकारिका॥ ९

॥अस्मिन्न जन्मन्न माप्यायस्वाभित्वा देवसवितरिंद्रं वो विश्वतस्पर्यग्निं दूतं यमायसोमं मोषु
णस्त्वायामिवायोशतं ज्मयाऽत्रत्राऽऽरुह्यासत्यान्वभ्यिनावर्तिरेमा सप्तर्षयणीधतोभित्यं
देवमायंगौरस्तरसांगंधर्वाप्यांयदक्रंदः कद्रुद्रायकुमारंमातानोमोषुणाऋषभंमादितिर्यजनि
ष्टतामग्निवर्णामिदं विष्णुरुद्दीरतामवरः परंमृत्योगणानांत्वाशंनोदेवीमहतोपस्यहिस्थये
स्योनापृथिवीमंमेगंगेधाम्नोधाम्नोराज्ञंस्त्रितित्रयस्त्रिंशत्॥ धाम्नोधाम्नोराजन्नितोवरुण
नोमुंचयदापोअघ्न्याइतिवरुणेतिशपामहेततोवरुणनोमुंच॥ मयिवापोमोषधीर्हिंसीर
तोविश्वव्यचाअस्तुत्वेनोवरुणनोमुंच॥ ॥मध्येब्रह्माष्टसोमादृष्यवस्कवसातिर्वायुसोमौज्ञरा
लाद्रुद्रादित्यश्विविश्वेधनदभद्दफणिस्वस्त्रियःसोमधात्रो॥ मध्याद्रुद्रंगुहोक्षादितिमथ
गिरिज्ञाज्ञोत्स्वधामृत्युरोगान्हेरंबंज्ञीवनीयंमहतमनुविधातुःकुसिंधूःसमुद्रान्॥ ॥इति

ब्र:मं:का:

सर्वतोभद्रदेवताः॥ ॥अथलिंगतोभद्रं॥ ॥एकोनविंशतिमिताउभयत्ररेखाकोष्ठसोमद
लभानिषट्त्रयाणि॥ तन्मध्यतोंतरिषुकोष्ठकभंखलाख्याकृष्णस्यवाणरसकोष्टकनीलव
ल्यः॥१॥कुक्षिद्वये तत्रदृष्टत्रिकुकोष्टरक्तेभद्रे ततःप्रतिदिशंधवलाचवापी॥ज्ञेयाद्विवेदर
सषट्जलधिद्विकोष्टाभद्रेचविंशतिपदाःपरिधिरक्तपीतः २ तन्मध्यषोडशपदेषुविधे
यमब्जंसमंसदष्टदलमीज्यस्करस्यगेहं॥ तद्वास्यनखित्रज्ञसमसाहृतस्यात्सर्वभद्रग
मिहांकगतिर्नवामे॥ ॥छ॥ ॥छ॥श्रीरस्तु॥ ॥ – – – – तिभूपशाकेजयेचाद्वेचया
म्यगे॥श्रावणेकृष्णसप्तम्यांविघ्ननाथोलिखत्सुधीः॥१॥ संवत १८५० मितिश्रसान्द एम० १०
वदि १५ ॥ छ छ छ

922